International Journal of Applied Research 2016; 2(1): 533-537




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2016; 2(1): 533-537
www.allresearchjournal.com
Received: 16-11-2015
Accepted: 19-12-2015

**डॉ. अशोक कुमार झा**
व्याख्याता (व्याकरण),
राजकीय धूलेश्वर आचार्य
संस्कृत महाविद्यालय,
मनोहरपुर, जयपुर,
राजस्थान, भारत

**Corresponding Author:**
**डॉ. अशोक कुमार झा**
व्याख्याता (व्याकरण),
राजकीय धूलेश्वर आचार्य
संस्कृत महाविद्यालय,
मनोहरपुर, जयपुर,
राजस्थान, भारत

# नैयायिकमतेन वाक्यार्थस्वरूपविचारः

## डॉ. अशोक कुमार झा

**सारांश**
व्याक्यार्थस्वरूपविवेचने बहूनि मतानि विहितानि बुधैः। तत्र पदसंघातो वाक्यम् “उद्योगो वाक्यार्थः” संसर्गो वाक्यार्थाः। इत्यादिनि मतानि बाहूल्येन दृश्यन्ते। तथापि उक्तानि वचनानि मतानि वा पदार्थानां संसर्गस्य वाक्यार्थत्त्वं बोधयन्ति। अनेन ज्ञायते यत् पदानि पदार्थस्मरण द्वारेण तत्संसर्गं लक्ष्यन्ति तदैव वाक्यार्थे प्रमाणम्।

**कूटशब्दाः** ब्रह्मसंघातः, आन्वीक्षिकी, संसृष्टाः, अपोद्धारः, विभाषा

**प्रस्तावना**
नैयायिकमते वाक्यस्वरूपम् - नैयायिकाः - वर्णा एवं समुदिताः पदवाक्यभावमापन्नाः अर्थप्रत्यायकाः इत्याहुः। तथा च भाष्यम्[1] -“वाक्यस्थेषु खलु वर्णेषूच्चरत्सु[2]” प्रतिवर्णं तावत् श्रवणं भवति। श्रुतं वर्णमेकमनेकं वा पदभावेन प्रतिसन्धत्ते। प्रतिसन्धाय पदं व्यवस्यति। पदव्यवसायेन स्मृत्या पदार्थः प्रतिपद्यते। पदसमूहप्रतिसन्धानाच्च वाक्यं व्यवस्यति। संबद्धांश्च पदार्थान् गृहीत्वा वाक्यार्थं प्रतिपद्यते, इति। न्यायलीलावत्यां[3] च – “किं तर्हि प्रातिपदिकम् ? क्रमवद्वर्णसंहतिरिति ब्रूमः”। इत्युक्तम्। न्यायमञ्जर्यामपि[4] - “किं पुनरिदं पदं नाम ? किं च वाक्यमिति। वर्णसमूहः पदम्। पदसमूहो वाक्यम्” इत्युक्तम्। एतन्मते वर्णा अनित्याः।

**नैयायिकमते वाक्यार्थः**
नैयायिकानां तु मते, पूर्वपूर्वे ये वर्णाः तद्विषया या समूहालम्बनात्मिका स्मृतिः, तत्सहकृतो योऽन्त्यो वर्णः, नश्यदवस्थेन श्रावणप्रत्यक्षरूपेणानुभवेन विषयी - क्रियमाणः स एव पदम्, एवं पूर्वपूर्वाणि यानि पदानि तावद्विषया या समूहालम्बनात्मिका स्मृतिः,तत्सहकृतमन्त्यमेव नश्यदवस्थेन श्रावणप्रत्यक्ष-रूपेणानुभवेन विषयीक्रियमाणं वाक्यमिति। इदं प्रायशः “पदसंघातो वाक्यम्” इति पक्ष एव अन्तर्भवति।
वर्णानां पदानां च उच्चरितप्रध्वंसिना अवस्थानाभावेन वस्तुभूतबाह्यसंघातासंभवेऽपि, पूर्वोक्तरीत्या स्मृत्यनुभवरूपाभ्यां बुद्धिभ्यां युगपत् उल्लेखात् यौगपद्योपपत्तया बौद्धसंघातः संभवति। विभुविशेषगुणद्वयस्य युगपत् अवस्थितिर्विरुद्ध्यति उत्पद्यमानावस्थया स्मृत्या विनश्यदवस्थस्या-नुभवस्य न विरोधः। एवं पूर्वपूर्वपदानां येऽर्थाः तद्विषयकं यदेकं स्मरणं समूहालम्बनात्मकं, तत्सहकृतेन अन्त्येन पदेनोत्पद्यमाना या परस्परसंसृष्टपदार्थविषया प्रतीतिः सैव वाक्यार्थविषयकत्वात् वाक्यार्थ इति इदमपि मतं प्रायशः संसर्गपक्ष एवान्तर्भवति। परस्परसंसृष्टपूर्वपूर्व-पदार्थसंसृष्टस्य चरमपदार्थस्यैव

वाक्यार्थत्वे पदार्थानां पदशक्यत्वेनान्ततो वाक्यार्थत्वं संसर्गस्यैव। एवं च न नैयायिकसंमतवाक्यार्थासंग्रहेणात्र वाक्यार्थलक्षणानाम-व्याप्तिर्वक्तव्येति।

## न्यायदर्शनानुसारेण वाक्यार्थस्वरूपम्

जयन्तभट्टेन न्यायमञ्जर्यां वाक्यार्थस्वरूपविषयेऽनेकानि मतानि प्रदर्शितानि। यथा[5]-

1. बाह्यस्य वाक्यार्थस्यासंभवात् पदार्थसंसर्गनिर्भासं ज्ञानमेव वाक्यार्थ इति केचित्।
2. वास्तवः पदार्थानां परस्परसंसर्गो बाह्य एव वाक्यार्थ इत्यन्ये।
3. अन्ययोगव्यवच्छेदो वाक्यार्थ इत्यपरे।
4. गुणीभूतकारकनिकरनिर्वर्त्या क्रिया वाक्यार्थ इत्येके।
5. भाव्यनिष्ठः पुरुषव्यापारः करोत्यर्थो भावनाशब्दवाच्यः वाक्यार्थ इत्यन्ये।
6. लिङादिशब्दवाच्यः शब्दभावनाख्यः पुरुषस्य अर्थभावनानुष्ठाने प्रवर्तकः विधिः वाक्यार्थः इत्यपरे।
7. नियोगाख्यां कार्यं वाक्यार्थ इत्यपरे।
8. उद्योगो वाक्यार्थ इति केचित्। इति

एतान् पक्षान् विस्तरेणानूद्य खण्डयित्वा स्वपक्ष एवमुपन्यस्त:[6] - वाक्यार्थस्तु न क्वचिदपि सूत्रकारभाष्यकाराभ्यां सूचित इति कुतः शिक्षित्वा वाक्यार्थस्वरूपं वयमाचक्ष्महे। किमिति ताभ्यामसौ न सूचितः, इत्याक्षेपं कृत्वा –

पृथक्प्रस्थाना हीमा विद्याः, प्रमाणविद्या चेयमान्वीक्षिकी न वाक्यार्थविद्येति। यद्येवं, पदार्थोऽपि कस्मादिह दर्शितः "व्यक्त्याकृतिजातयस्तु पदार्थः" इति। स्थाने प्रश्नः। स तु शब्दानामर्थासंस्पर्शितां वदन्तं रुदन्तं च शमयितुं शब्दप्रामाण्यसिद्धये सूत्रकृता यत्नः कृतः। यद्येवं वाक्यार्थमपि बाह्यं वास्तवमन्तरेण शास्त्रस्य प्रमाणता न प्रतिष्ठां लभत इति तत्रापि यत्नं कृतं मन्यते सूत्रकारः। यदयं पृथक् पदार्थेभ्यो न वाक्यार्थमुपदिशति स्म, तस्मादयमस्याशयः पदार्थ एव वाक्यार्थ इति। किं तु नैकः पदार्थः अपि तु अनेकः पदार्थो वाक्यार्थः। यद्यपि "सामान्ये हि पदं वर्तते, विशेषे वाक्यम्। अन्यच्च सामान्यम्, अन्यो विशेषः" इति मीमांसाभाष्यकारेण शबरस्वामिना[7], "यदत्राधिक्यं स वाक्यार्थः" इति व्याकरणभाष्यकारेण पतञ्जलिना[8] चोक्तत्वात् पदार्थादन्यो वाक्यार्थ इति प्रतीयते। तथापि, अनेकः पदार्थो वाक्यार्थः, न पुनरेक इत्युक्तौ न कोऽपि दोषः एतदुक्तं भवति - परस्परसंसृष्टपदार्थसमुदायो वाक्यार्थ इति संसर्ग एवाधिक इति "यदत्राधिक्यम्" इत्युच्यते। न चानाक्षुमविशेषः, संसर्गः संभवतीति विशेषो वाक्यार्थ इत्युच्यते। संसर्गस्तु स्वरूपतो न वाक्यार्थ, अपदार्थत्वात्। तस्मात् संसृष्टो वाक्यार्थः इत्युपपादितम्। अग्रेऽपि – "तस्मात् गुणप्रधानभावानियमात् अन्योन्यसंसृष्टपदार्थसमुदायो वाक्यार्थ इत्येतावदेव श्रेयः" इति।

> "वाक्यार्थं मन्यते ये च नियोगं भावनां क्रियाम्।
> तैरप्यन्योन्यसंसृष्टः पदार्थग्राम इष्यते"।।

इति च निगमनं कृतम्। तेन परस्परसंसृष्टाः पदार्थाः वाक्यार्थ इति जयन्तभट्टस्य सिद्धान्तः।

न्यायभाष्यकार:[9] "संबद्धांश्च पदार्थान् गृहीत्वा वाक्यार्थं प्रतिपद्यते" इति वदन् पदार्थज्ञानानन्तरं वाक्यार्थज्ञानं भवतीति आवेदयति। वाक्यार्थस्वरूपं तु भाष्यकारेण न प्रदर्शितम्। तात्पर्यटीकाकारा वाचस्पतिमिश्राः शब्दप्रमाणस्यानुमानविधया प्रमाजनकत्वमिति वैशेषिकमतानुवादसमये अनुमानद्वयमुपातिष्ठन्। यथा[10] -

"पदैः स्मारिताः पदार्था गुणप्रधानभावेनावस्थिताः संसर्गवन्तः, आकाङ्क्षायोग्यतासत्तिमत्त्वे सति पदैः स्मारितत्वात्" इति, "अयं पदकदम्बकविशेषः स्मारितपदार्थसंसर्गवान् आकाङ्क्षादिमत्त्वे सति पदकदम्बत्वात्" इति च। अनेन पदार्थाना, संसर्गो वाक्यार्थः इति सूचयन्ति। तथा तत्रैव स्वमतप्रतिपादनावसरे[11] -

"तस्मात् पदान्येव पदार्थस्मरणद्वारेण तत्संसर्ग लक्षयन्ति वाक्यार्थे प्रमाणम्" इति पदार्थानां संसर्गस्य वाक्यार्थत्वमाविष्कृतवन्तः। उदयानाचार्यस्तु टीकाकारवत् पदार्थानां संसर्गस्यैव वाक्यार्थत्वं मन्यन्ते। न्यायकुसुमाञ्जलौ पञ्चमस्तबके षष्ठश्लोकव्याख्यानावसरे -

"पदवाक्ययोः पदार्थसंसर्गो विहाय प्रतिपाद्यान्तराभावात्" इति, तथा षोडशश्लोकव्याख्यानवसरे – "संसर्गभेदप्रतिपादकत्वं ह्यत्र वाक्यत्वमभिप्रेतम्" इति च तैः उक्तत्वात्। मणिकृतोऽपि पदार्थानां संसर्ग एव वाक्यार्थ इति आशेरते। तदुक्तं शब्दखण्डे[12] तैः-

"तस्मात् पदं करणम्, पदार्थस्मरणं व्यापारः, आकाङ्क्षादि-सहकारिवशात् स्मारितार्थान्वयानुभवः फलम्" इति। स्मारितार्थान्वयः = पदस्मारितानामर्थानां संसर्गः।

## गदाधरभट्टाचार्यः व्युत्पत्तिवादे

"शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते" इति प्रथमवाक्येन वाक्यघटकपदार्थानां यः अभेदरूपो भेदरूपो वा संबन्धः स आकाङ्क्षया शाब्दबाधे भासत इति प्रतिपादयन्तः पदार्थानां संसर्गस्यवाक्यार्थत्वं मन्यन्ते।

अत्र किंचिदवधेयम्। नैयायिकमते वाक्यार्थ इत्यस्य वाक्यशक्य इति वा वाक्यलक्ष्य इति वा नार्थः। वाक्ये शक्तिलक्षणयोरनङ्गीकारात्। किं तु वाक्यप्रतिपाद्य इत्यर्थः। पदसमूहात्मकवाक्यजन्यशाब्दबोधात्मक-प्रतिप्रत्तिविषयः इत्यर्थः। सा च प्रतिपत्तिः आकाङ्क्षावशात् इति।

किञ्च न्यायनये शक्तं पदमिति स्वीकारात् प्रकृतिप्रत्यययोरपि स्वस्वार्थे शक्तत्वात् प्रकृतिप्रत्यय - समुदायस्य वाक्यत्वमस्ति वा न वा ? अस्ति चेत् "घटमानय" इति वाक्यद्वयं स्यात्। न चेष्टापत्तिः, एकं वाक्यमिति लोकप्रसिद्धिविरोधात्। नास्ति चेत्, शक्तं पदम्, वाक्यं तु पदसमूहः इति स्वोक्तिविरोध इति बहवः पृच्छन्ति।

अत्र समाधानं तावत् एवं वक्तव्यम् – "घटमानय" इति वाक्यद्वयम्। एकवाक्यताप्रसिद्धिस्तु वाक्यैकवाक्यतामलम्ब्य - इति। तदुक्तम् आकाङ्क्षावादे मणिकार:[13] -

"प्रकृतिप्रत्ययाभ्यामन्वयबोधे जनितेऽपि वाक्यैकवाक्यतावत् क्रियाकारकपदयोः अजनितान्वयबोधत्वमाकाङ्क्षा" इति। तत्र "वाक्यैक – वाक्यतावत्" इति वत्कारं कुर्वतः मणिकारस्य अयमाशयः, यत्र परिपूर्णयोः द्वयोः वाक्ययोः उत्थापिताकाङ्क्षावशात् परस्परार्थान्वयानुभावकत्वं तत्रैव वाक्यैकवाक्यता। तदुक्तं भट्टपादै:[14] -

"स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया।
वाक्यानामेकवाक्यात्वं पुनः संहत्य जायते"।। इति।

प्रकृते "घटम्" इति पदस्य "आनयेति" पदस्य च शक्यसमुदायरूपस्यापि क्रियाकारकसाङ्गत्वेन परिपूर्णत्वाभावात् कथमत्र वाक्यैकवाक्यता मुख्या स्यात्। अतः "वाक्यैकवाक्यत्वात्" इत्युक्तम्। संसर्गबोधक वाक्यमिति मत्वा वाक्यद्वयमिति स्वीकृत्य वाक्यैकवाक्यतान्यायोऽत्र इति।

## लघुमञ्जूषादृष्ट्या वाक्यशक्तिविचारः

लघुमञ्जूषायाः प्रारम्भ वाक्यस्फोटस्य मुख्यत्वं प्रतिपादयता श्रीमता नागेशभट्टेन न्यायभाष्यकारमतमुपस्थापितं "पदसमूहो वाक्यम्[15]" इति। अत्र "अर्थसमाप्तौ" इति शेषः अर्थात् योजनीयः। अन्यथा गौः अश्वः पुरुषः इत्यादिपदसमूहानामपि वाक्यत्वम् आपद्येत। अर्थसमाप्ताविति योजनया तु क्रिया विना निराकाङ्क्षबोधाशक्यत्वात् क्रियापदप्रयोगोऽप्यावश्यकः। एतेन प्रकृतिप्रत्ययघटितसमुदायस्य पचतीत्यादेर्वाक्यत्व-माधुनिकनैयायिकसम्मतं निरस्तम्, अर्थसमाप्तेरभावेन न्यायभाष्यविरोधात वाक्यव्यहारस्य निरूप्यनिरूपकभावापन्नविषयता-प्रयोजकसुप्तिङन्तसमुदाय एव प्रसिद्धत्वाच्च। ननु प्रविश पिण्डीमित्यादेस्तादृशार्थबोधकत्वेऽपि सुप्तिङन्तसमुदायत्वाभावाद् वाक्यत्वं न स्यादिति चेन्न इष्टापत्तेः, सुप्तिङन्तसमुदायार्थबोधकस्यैव वाक्यत्वेन तत्रापि तत्त्वस्य सत्त्वाच्च। पदसमूहो इति - यद्यप्येको निरवयवः स्फोटो वाक्यं, प्रतिभा वाक्यार्थ इति सिद्धान्तस्तथाऽपि पदे प्रकृतिप्रत्ययादिकल्पनावद् वाक्येऽपि पदकल्पनामात्रमित्याश्रित्येदम्। तदुक्तं हरिणा[16]_

"यथा पदे विभज्यन्ते प्रकृतिप्रत्ययादयः।
अपोद्धारस्तथा वाक्ये पदानामुपवर्ण्यते"।। इति

अत एव "सुप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विता" इत्युक्तम्। अर्थात् पदम् अनेकविधम् - यथा - सुबन्तसमूहः, तिङन्तसमूहः सुप्तिङन्तसमूहश्च। तत्र सुप् च तिङन्तश्च सुप्तिङन्ते, सुब्विशिष्टं तिङन्तं सुप्तिङन्तं तयोरेकशेषः तेन कारकान्वितक्रियाबोधकसुबन्तचयतिङन्तचयसुप्तिङन्तचयानां त्रयाणां रामेण शयितव्यम्, पचति भवति, चैत्री गच्छतीत्यादीनामपि वाक्यत्वम्। कदाचित् एकया क्रिययाऽपि वाक्यार्थबोधः। यथा प्रविश, याहि, आयाहि इत्यादिस्थलेषु कर्तृपदानाम् आक्षेपः।

वार्तिककारेण "एकतिङ् वाक्यम्"[17] इत्युक्तम्। अनेन वाक्येन एक तिङन्तं पदमावश्कम्। यत्र च एकाधिकं तिङन्तं पदं तत्रैकस्य विशेषणत्वमपरस्य च विशेष्यत्वम्। अत आह - नागेश: "एकतिङर्थमुख्यविशेष्यत्वं वाक्यत्वम् इति। तेन पचति भवतीत्यादि स्थले भवति क्रियायाः मुख्यत्वं पचति क्रियायाः विशेषणत्वम्। पचति क्रिया कर्तृपरा, तेन पाककर्तृकः वर्तमानकालिकः उत्पत्त्युकूलो व्यापार इति शाब्दबोधः। अत्र आंशक्यते यत् कथं एक तिङन्तम् अपरस्य तिङन्तस्य विशेषणं स्यात्। तदोच्यते –

"यथानेक सुबन्तं हि सुबन्तस्य विशेषणम्।
तथा तिङन्तमप्याहु तिङन्तस्य विशेषणम्"।।

"भूवादयो धातवः"[18] इति सूत्रेऽपि भाष्ये एतत्स्ष्टम्।

ननु शक्तं पदमिति मते प्रकृतिप्रत्ययादिसमूहस्यापि वाक्यत्वापत्तिरत आह - पदं सुबन्तं तिङन्तश्चेति। तदुक्त गौतमेन "ते विभक्त्यन्ताः पदम्" इति। तेन - पदशब्देन सुबन्ततिङन्तसमूहश्चेत्यर्थः। यत्तु इत्यनेन नागेशः कथयति - मौनिश्लोकादितोऽपि बोधदर्शनात्पदस्य शाब्दबोधे कारणत्वं

किन्तूपस्थितेरेवेति तार्किकप्राञ्चः, तन्न "प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणम्" इति चिन्तामणिलक्षणेनैव प्रयोगहेतुभूतं यदर्थविषयकं यथार्थज्ञानं तज्जन्यतावच्छेदकावच्छिन्नार्थस्य ग्राहेकेणेश्वरस्य प्रयोगहेतुभूतार्थतत्त्व-ज्ञानमादाय तन्निष्ठजनकतानिरूपित-जन्यतामादाय मौनिनानुसन्धीय-मानश्लोकस्यापि तादृशजन्यताधेयत्वेना-व्याप्तेरभावात् तत्राप्यनुसन्धानाभि-व्यङ्ग्यस्फोटात्मकशब्दस्य सत्त्वेनादोषाच्च। ननु पदसमूहो वाक्यमर्थसमाप्सावित्यनन्वितमत आह - समर्थमिति। शेष इति - तथा च पदसमूहरूपं वाक्यमर्थविषयकनिराकाङ्क्षबोधे शक्तमित्यर्थः। एतावदन्तेन वाक्यस्य निराकाङ्क्षबोधजनकत्वं समर्थितम्। 'परं वाक्यस्य निराकाङ्क्षबोधजनकत्वात् वाक्येषु पदकल्पना पदेषु प्रकृतिप्रत्यय-कल्पना च व्यर्थमेव गौरवात्' इति शङ्कायां नागेशेन लघुमञ्जूषायां मूले उक्तम् "तत्र प्रतिवाक्यं सङ्केतग्रहासम्भवात्तदन्बाख्यानस्य लघूपायेनाशक्यत्वाच्च कल्पनया पदानि प्रविज्य पदे प्रकृतिप्रत्ययभागकल्पेन कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं परिकल्पयन्ति स्माचार्याः"। एतदेवाभिप्रेत्य 'विभाषा सुपः[19]' इति सूत्रे कैयटः "अन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययानामिह शास्त्रेऽर्थवत्ता-परिकल्पनात्" इत्याह। तत्तदवयवत्तदर्थबोधनेन समुदायस्य समुदायार्थस्य च बोधने तात्पर्यमृषीणाम्। स्पष्टश्चेदमर्थवत्सूत्रे भाष्यकैयटयोः श्रुतिवाक्यादीनां बलाबलबिचारकल्पनार्थश्च तत्कल्पनेति बोध्यम्"। रत्नप्रभासंवलिताटीकायां सभापतिशर्मोपाध्यायः अस्याशयं स्पष्टयति - "ननु वाक्यस्याखण्डत्वात् पदादिप्रतीतिर्भ्रम एवेत्याशङ्क्याह 'तत्रेति' - पूर्वोक्त इत्यर्थः। सङ्केतेति - सङ्केतग्राह्यशक्तिग्रहासम्भवादित्यर्थःतदिति वाक्येत्यर्थः। कल्पनयेति - विषयाभावेऽपि तद्बोधकल्पना। वाक्ये पदानि पदे च प्रकृतिप्रत्ययभागं परिकल्प्य कल्पिताभ्यामन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययार्थाः कल्पिता इत्यर्थः। अयम्भावः, घटमानयेत्यत्र घटसत्त्वे तदर्थबोधो जायते, तद्भावे न जायत इति घटशब्दस्य सोऽर्थः, एवमम्शब्दसत्त्वे कर्मत्वस्य भानं भवति, तदसत्त्वे न भवतीत्यम्शब्दस्य सोऽर्थः, इत्येवं कल्पनयेति। न च तृजादीनां कर्तृवाचकत्वं न स्यात्, ण्वुलादिना कर्तृबोधेन व्यभिचारात् कार्यसमानाधिकरणात्यन्ताभाव-प्रतियोगितानवच्छेदकधर्मावच्छिन्नस्यैव कारणात्वादिति वाच्यम् तृणारणिमणिन्यायेन तुजव्यवहितोत्तरजायमान-कर्तृविषयबोध प्रति तृचः कारणत्वमित्येवंविधकार्यकारणभाव-स्वीकारेणान्वयव्यतिरेकयोर्व्यभिचारा-भावात्।

कल्पिताभ्यामिति-प्रकृत्यादेः कल्पितत्वेनान्वयव्यतिरेकयोः कल्पितत्वम् तत्तदर्थविभागमिति - प्रकृतिप्रत्ययार्थविभागमित्यर्थः। शास्त्रमात्रमिति - लोके बोधजनकतया वाक्यस्यैवोपयोगित्वेन प्रकृत्यादिकल्पना लाघवेन शाखप्रक्रियामात्रोपयोगिनी। एतदेवेति-शास्त्रप्रक्रियाविषयकत्वमेवेत्यर्थः। विभाषेति – "विभाषा सुपो बहुच् पुरस्तात्तु[20]" इति सूत्र इत्यर्थः। तत्र हि सुब्ग्रहणं किमर्थमिति प्रतीकमादाय सुबन्तस्य प्रियकुत्सनादिषु वर्तनादर्थलभ्यं सुबन्तत्वमिति प्रश्नाशयमुक्त्वा प्रातिपदिकान्माभूदिति भाष्यप्रतीके "अन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययानामिह शास्त्रेऽर्थवत्ता-परिकल्पनात् प्रातिपदिकमपि स्वार्थदिपश्चके प्रवर्तमानं प्रियकुत्सनादिषु प्रवर्तत इति ततोऽपि प्रत्ययप्रसङ्गः" इत्युक्तम्। ननु वस्तुतः प्रकृतिप्रत्ययादीनामभावेऽपि तद्वर्णने मुनीनाम् प्रामाण्यमत आह - तत्तदिति-तत्तदवयवबोधनेन तत्तत्समुदायस्य तत्तदवयवार्थ बोधनेन च तत्तत्समुदायार्थस्य च बोधन एव तात्पर्यात्राप्रामाण्यमिति भावः न च तत्तदवयवेत्याद्यनुपपन्नमेक-शेषापत्तेरिति वाच्यम् "सर्वस्य द्वे[21]" इत्यत्र द्विवचननिर्देशेना-प्रत्यस्तमितावयवभेदस्य समुदायस्य वीप्सायामादेशत्वेन स्थानद्विर्वचनपक्ष द्विः प्रयोगद्विवचनपक्षेऽपि कृतद्विर्वचनस्य समुदायस्यापि सुबन्ततदादितयाऽर्थशब्देन कर्मधारय एकशेषाप्रवृत्तेः सहविवक्षाया अभावात्। भाष्यकैयटयोरिति - विशेष्यविशेषणभावरूपे संसर्ग वाक्यस्य शक्तिं स्वीकृत्य समासग्रहणस्य नियमार्थत्वं भाष्ये उक्तम्। कैयटे "ध्वनिव्यङ्ग्यं नित्यं वाक्यं विशिष्टार्थस्य पदार्थसंसर्गरूपस्य वाचकम्" इत्युक्तमिति भावः। नन्ववयव-द्वाराऽवयवार्थद्वारा समुदायस्य समुदायार्थस्य च बोधने मुनीनां तात्पर्यसत्त्वेऽवयवमात्रकल्पनेनापि लाघवेन वाक्यान्याख्यानसिद्धिरित्यवयवार्थ-कल्पना व्यर्थेत्यत आह – श्रुतीति-श्रुत्यादीनामित्येव वक्तव्ये श्रुतिवाक्यादीनामित्युक्तिर्वाक्य-स्फोटस्यैव मुख्यत्वद्योतनाय। यथा व्याकरणे "परनित्यान्तरङ्गा-पवादानामुत्तरोत्तर बलीयः" तथा मीमांसायां श्रुत्यर्थविचारे "श्रुतिलिङ्गवाक्यप्रकरण-स्थानसमाख्यानां समवाये 'पारदौर्बल्यमर्थविप्रकर्षात्' इति नियमादुत्तरोत्तरस्य दुर्बलत्वं बोध्यते। अवयवार्थकल्पने तद्सिद्ध्या तत्कल्पनेति भावः। बलाबलेति – 'ऐन्द्रया गार्हपत्युमुपतिष्ठते" अत्र श्रुत्या लभ्यमानं गार्हपत्योपस्थानं प्रबलम्। इन्द्रोपस्थानं त्विन्द्रो देवतास्या इति तद्धितानुसन्धानमूलकत्वाद् दुर्बलमित्यादिविचारेत्यर्थः। वाक्यस्याखण्डार्थबोधकत्वे च बलबलधिकरणोच्छेद एव स्यादिति भावः।

लघुमञ्जूषायां शक्तिपदार्थः कः ? इति विवेचनावसरे नैयायिकोक्तम् "ईश्वरेच्छा शक्तिः" इति मतम् इच्छायाः सम्बन्धिनोराश्रयता-नियामकत्वाभावेन

सम्बन्धत्वासम्भवात्, सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति, द्विष्ठत्वे च सति आश्रयता विशिष्टबुद्धिनियामकः 'इत्यभियुक्तव्यवहारात्' इत्युक्त्वा दूषितम्।

पुनः पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः, वाच्यवाचकभावा-परपर्याया।

तद्ग्राहकश्चेतरेतराध्यासमूलकं तादात्म्यम्। "तादात्म्यं तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वमिति भेदाभेदसमनियतम्"। तदेव सम्बन्ध- इति मतं स्थापितम्। किन्तु "शब्दकौस्तुभकारेण पदपदार्थयोर्बोध्य-बोधकभावनियामिका शक्तिरेव सम्बन्धः इत्युक्तम्, तन्न। शक्तेरपि कार्यजनकत्वे सम्बन्धस्यैव नियामकत्वात्। दीपगतप्रकाशकत्वशक्तावपि सम्बन्धे सत्येव वस्तुप्रकाशकत्वं नान्यथेति दृष्टत्वात्। तदुक्तं भर्तृहरिणा[22]-

"उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते।
शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुणः।। इति

उपकार्योपकारकयोः उपकारस्वभावसम्बन्धः यत्र तिष्ठति तत्र शक्तेः निरूपकतादात्म्यादिसम्बन्धस्य अनुमितिः करणीया। यतोहि शाब्दबोधरूपकार्यस्य आपत्तिः तदेव सम्भवति। अयं सम्बन्धः शक्तेरपि शक्तिरस्ति, अर्थात् तस्मात् बोधकरणे उपकारकोऽस्ति तथा च गुणानामपि गुणः अर्थात् द्रव्याश्रितत्वस्य नियामकः वर्तते। एतादृशी व्याख्या वाक्यपदीयस्य टीकाकारेण हेलाराजेन कृता। अयं शक्तिसम्बन्धः तस्य सहकारीसम्बन्धश्च न केवलं पदेषु, अपितु वाक्येषुऽपि वर्तते। एतन्मतं न्यायभाष्यकारेणाऽपि समर्थितम् "समयज्ञानार्थं चेदं पदलक्षणाया वाचोऽर्थलक्षणम्" अर्थात् मीमांसाशास्त्रेण भवति। अनया व्याख्यया स्पष्टंभवति यत् पदेष्विव वाक्येष्वपि ईश्वरस्य अनादिसङ्केतोऽस्ति। वाक्यविषये शक्तेः ग्राहकमाकाङ्क्षायोग्यतादिरपि ज्ञानं कारणरूपे अपेक्षितम्। अयमीश्वरीय-सङ्केतः व्याकरणशास्त्रेण व्युत्पादितः ये साधुशब्दाः, तेभ्यः उक्तः, न तु अपभ्रंशरूपासाधुशब्देभ्यः।

## संदर्भ


1. न्यायभाष्यम् - 3.2.59
2. 'उच्चार्यमाणेषु' इत्यर्थः।
3. न्यायलीलावती पृ. - 671
4. न्यायमञ्जरी भाष्यम् 2, पृ. -143
5. न्यायमञ्जरी भाष्यम् 2, पृ. - 69
6. न्यायमञ्जरी भाष्यम् 2.पृ.135 - 136
7. शाबरभाष्यम् - 2.1.24
8. महाभाष्यम् - 2.3.46
9. न्यायसूत्रम् - 3.2.62
10. न्यायवार्तिकतात्पर्यटीका 2.1.52
11. न्यायवार्तिकतात्पर्यटीका 2.1.52
12. तत्त्वचिन्तामणिः ।
13. तत्त्वचिन्तामणिः।
14. तन्त्रवार्तिकम् 1.4.22
15. न्यायभाष्यम् - 2.1.55
16. वाक्यपदीयम् - 2.10
17. महाभाष्यम् - 2.1.1
18. पाणिनिसूत्रम् -1.3.1
19. अष्टाध्यायीसूत्रम् - 5.3.68
20. पाणिनिसूत्रम् - 5.3.68
21. पाणिनिसूत्रम् - 8.1.1
22. वाक्यपदीयम् - 3.3.6